आज्यदोहानि सामानि शान्तिकं भारुण्डानि च। पश्चिमे द्वारपालौ तु पठेतां सामगौ तथा”। इति दानपारिजातधृतवाक्यम्।

**ज्येष्ठस्थान** न०। काशीस्थे तीर्थभेदे तत्स्थानमाहात्म्यादि कथा काशीख० ६३ अ०।

“यमनेहसमारभ्य मन्दराद्रौ विनिर्ययौ। अद्रीन्द्रसुतया सार्द्धं रुद्रेणोक्षेन्द्रगामिना। तं वासरं पुरस्कृत्य जग्राह नियमं दृढम्। जैगीषव्यो महामेधाः कुम्भयोने! महाकृती। विषमेक्षणपादाब्जं समीक्षिष्ये यदा पुनः। तदाम्बुविप्रुषमपि भक्षयिष्यामि चेत्यहो। कुतश्चिद्धारणायोगादथ वा शम्भ्वनुग्रहात्। अनश्नन्नपिबन् योगी जैगीषव्यः स्थितो मुने!। तं शम्भुरेव जानाति नान्यो जानाति कश्चन। अतएव ततः प्राप्तः प्रथमं प्रमथाधिपः। ज्यैष्ठशुक्लचतुर्दश्यां सोमवारानुराधयोः। तत्पर्वणि महायात्रा कर्त्तव्या तत्र मानवैः। ज्येष्ठस्थानं ततः काश्यां तदाभूदतिपुण्यदम्। तत्र लिङ्गं समभवत् स्वयं ज्येष्ठेश्वराभिधम्। तल्लिङ्गदर्शनात् पुंसां पापं जन्मशतार्ज्जितम्। तमोऽर्कोदयमाप्येव तत्क्षणादेव नश्यति। ज्येष्ठवाप्यां नरः स्नात्वा तर्पयित्वा पितामहान्। ज्येष्ठेश्वरं समालोक्य न भूयो जायते भुवि। आविरासीत् स्वयं तत्र ज्येष्ठेश्वरसमीपतः। सर्वसिद्धिप्रदा गौरी ज्येष्ठा नाम समन्ततः। ज्यैष्ठे मासि सिताष्टम्यां तत्र कार्य्यो महोत्सवः। रात्रौ जागरणं कार्य्यं सर्वसम्पत्समृद्धये। ज्यैष्ठां गौरीं नमस्कृत्य ज्येष्ठवापीपरिप्लुता। सौभाग्यभाजनं भूयाद् योषा सौभाग्यभागपि। निवासं कृतवान् शम्भुस्तस्मिन् स्थाने यतः स्वयम्। निवासेश इति ख्यातं लिङ्गं तत्र परं तपः। निवासेश्वरलिङ्गस्य सेवनात् सर्वसम्पदः। निवसन्ति गृहे नित्यं नित्यं मैति पदं पुनः। कृत्वा श्राद्धं विधानेन ज्येष्ठस्थाने नरोत्तमः। ज्येष्ठां तृप्तिं ददात्येव पितृभ्यो मधुसर्पिषा। ज्येष्ठतीर्थेश्वरे काश्यां दत्त्वा दानानि शक्तितः। ज्येष्ठान् स्वर्गानवाप्नोति नरो मोक्षञ्च गच्छति। ज्येष्ठेश्वरोऽर्च्चः प्रथमं काश्यां श्रेयोऽर्थिभिर्नरैः। ज्येष्ठा गौरी ततोऽभ्यर्च्या सर्वज्येष्ठमभीप्सुभिः”।

तत्रत्यं ज्योतिःस्वरूपलिङ्गन्तु ज्येष्ठेश्वराभिधं महादेवस्य नितम्बभूतम् यथोक्तं काशीख० ३३ अ०।

“सर्वेषामपि लिङ्गानां मौलित्वं कृत्तिवाससः। ओङ्कारेशः शिखा ज्ञेया लोचनानि त्रिलोचनः। गोकर्णभारभूतेशौ तत्कर्णौ परिकीर्त्तितौ। विश्वेश्वराविमुक्तौ च द्वावेतौ दक्षिणौ करौ। कर्णेशमणिकर्णीशौ द्वौ करौ दक्षिणेतरौ। कालेश्वरकपर्द्दीशौ चरणावतिनिर्मलौ। ज्येष्ठेश्वरो नितम्बश्च नाभिर्वै मध्यमेश्वरः। कपर्दोऽस्य महादेवः शिरोभूषा श्रुतीश्वरः। चन्द्रेशो हृदयन्तस्य आत्मा वीरेश्वरः परः। लिङ्गं तस्य तु केदारः शुक्रं शुक्रेश्वरं विदुः। अन्यानि यानि लिङ्गानि परःकोटिमितानि च। ज्ञेयानि नखलोमानि वपुषो भूषणान्यपि। यावेतौ दक्षिणौ हस्तौ नित्यं निर्वाणदौ हि तौ। जन्तूनाममयं दत्त्वा पततां मोहसागरे”।

**ज्येष्ठामूलीय** पु० ज्येष्ठां मूलं वा नक्षत्रमर्हति पौर्णमास्याम् छ। ज्यैष्ठे मासि तन्मासीयपौर्णमास्यां हि ज्येष्ठामूलयोरन्यतरस्य योगसम्भवात्तस्य तथात्वम्। यथा च तस्य तथात्वं तथा कार्त्तिकशब्दे १६४८ पृ० दर्शितम्।

**ज्येष्ठाम्बु** न० नि० कर्म्म०। तण्डुलप्रक्षालने जले वैद्यकप० तस्यातीव श्रेष्ठगुणत्वात्तथात्वम्।

**ज्येष्ठाश्रम** पु० ज्येष्ठ आश्रमो यस्य। “यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्। गृहस्थेनैव धार्य्यन्ते तस्मात् ज्येष्ठाश्रमो गृही” मनूक्ते १गार्हस्थ्याश्रमयुक्ते कर्म०। २गृहस्थाश्रमे च “गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः। चत्वारश्चाश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः इत्युक्तेस्तस्य सर्वाश्रमपोषकत्वेन श्रेष्ठत्वात्तथात्वम्। ततः इनि। गृहस्थाश्रमीत्यर्थत्र।

**ज्यैष्ठ** पु० ज्यैष्ठी पूर्णिमास्मिन् मासे अण्। ज्येष्ठानक्षत्रयुक्तयोगार्हपौर्णमासीघटिते वृषस्थरव्यारब्धे शुक्लप्रतिपदादिदर्शान्तरूपे १चान्द्रे मासे “ज्यैष्ठे मासि क्षितिसुतदिने जाह्नवी मर्त्यलोके” ति०त०। तथाभूतेऽर्द्धमासात्मके २पक्षे। ज्येष्ठामूलानक्षत्रयोरन्यतरनक्षत्रे पर्वान्तकाले गुरोरुदयास्तोपलक्षिते ३वार्हस्पत्ये वर्षभेदे च कार्त्तिकशब्दे १६४६ पृ० विवृतिः। “ज्यैष्ठे संवत्सरे चैव ज्यैष्ठमासस्य पूर्णिमा। ज्येष्ठाभेन समायुक्ता महाज्यैष्ठी प्रकीर्त्तिता” राजमार्त्त०। ज्यैष्ठसंवत्सरश्च। “ज्येष्ठामूलोपगे जीवे वर्षं स्यात् शाक्रदैवतम्” विष्णुधर्म्मोत्तरोक्तः ग्राह्यः” ति०त०। वृषस्थरविके सौरे ४मासभेदे च।

**ज्यैष्ठी** स्त्री ज्येष्ठानक्षत्रेण तत्समीपस्थमूलानक्षत्रेण वा युक्ता पौर्णमासी अण् ङीप्। १ज्येष्ठामूलानक्षत्रान्य-